International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 265-266
© 2020 IJSR
www.anantaajournal.com
Received: 12-07-2020
Accepted: 17-08-2020

**डॉ. आषुतोष कुमार मिश्र**
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीडा, पी. टी. सी., दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ. आषुतोष कुमार मिश्र**
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीडा, पी. टी. सी., दरभंगा, बिहार, भारत

# दषरूपकेषु नाटकस्य स्थानम्

**डॉ. आषुतोष कुमार मिश्र**

**सारांशः**
संस्कृत साहित्ये नाटकस्य स्थानं महत्वपूर्णं विद्यते। नाट्यषास्त्रस्य प्रणेता आचार्य भरतमुनिना दषरूपकस्य विषये विषिष्टव्याख्यानं विधाय तस्य लोकोपकारकत्वं प्रतिपादितम्।

## प्रस्तावना

समाजे सामान्यो नियमो विद्यते यत् ऋते प्रयोजनं कस्यचन जनस्य किमपि कार्यम्प्रति प्रवृत्तिर्न जायते। अर्थात् यति कुत्रापि कस्यचित् प्रवृत्तिर्भवति चेत्, तत्रावष्यम्, केचित् प्रयोजनेन भवितव्यमिति सामान्यरूपेण अवधानीयमस्ति। अयमेव नियमः अत्रापि प्रसघ्गे सघ्घटते। अर्थात् यति नाटकम् अस्ति तत्प्रति जनानां प्रवृत्तिः आकर्षणं वा भवति चेत्, तत्रापि अवष्यं केनापि प्रयोजनेन भाव्यम्।

अस्य सम्बन्धे बहवः किंवदन्तीप्रकल्पाः श्रूयन्ते, इतिहासादिषु पठ्यन्ते च। तत्रैकः प्रकल्पः सर्वथा प्रधानत्वं भजते। परमप्राचीनकाले जातिक्रमेण कर्मविधानं सम्यग् विभक्तम् आसीत्। तदा समाजस्य एको वर्गः कृषिषिल्पादिषु नित्यमेव संलग्नः तिष्ठति स्म। नित्यमसो स्वकीयगहनकार्यातिरिक्ते समये मानसिकसम्पोषणाभावे जीवने परम् वैरस्यम् अनुभवन्ति स्म। वेदादीनां शास्त्रपुराणादीनां चाध्ययने स वर्गः चाधिकृतोऽपि न आसीत्, किन्तु श्रान्तमानसानां कृतेऽपि कष्चनैकोऽवसरः अपेक्ष्यते, यत्र जना जीविकाजन्यावष्यकोधोगातिरिक्ते काले पुनःषक्तिग्रहणाय परिश्रान्तोपकरणाय च प्रभवा भवेयुः। एवमेव व्यतीते सुदीर्थकाले सततान्वेषण परैः बुद्धिजीविभिः काव्यस्य अयम्प्रकारः समुत्पादितः। यद्यपि काव्यस्य अनेके प्रकाराः प्रोक्ताः सन्ति, तेषु नाटकविधेव सर्वोत्कृष्टा, सर्वोपादेया, सर्वमनोहरा च भवति। अतएव समालोचकमुखैः प्रायेण श्रूयते– ''काव्येषु नाटकं रम्यमिति''। अतोऽत्र विचारणीयमस्ति यत् नाटकानां रम्यत्वमेव तस्य प्रयोजनीयता स्वीकरणीया भवितुमर्हति। यतो हि कस्यचित् वस्तुनः वैषिष्ट्यमेव तदुपादेयत्वस्य हेतुर्भवति। अतो हि काव्यस्य गद्यपद्यचम्पू– उतममध्यमाध्मादिभेदेन बहवे भेदा भवन्ति। तत्रापि च बहव उपप्रकारा कीर्तिताः सन्ति। एते सर्वे एव काव्यप्रकाषः श्रवणेन्द्रियप्रयोगेण आनन्ददायका भवन्ति। श्रवणेन्द्रियमाध्यमेन आनन्दग्रहणाय शब्दानां श्रवणम् अपेक्षितं भवति। यत्र शब्दं श्रुत्वा अर्थबोधः क्रियते तत्र शब्दार्थयोः सम्बन्धस्य, वाच्यवाचकज्ञानस्यापि श्रोता अपेक्षां करोति। अर्थात् यो हि श्रोता शब्दं श्रृणोति, तदर्थं न जानाति, तत्र तस्य शब्दश्रवणम् अपि व्यर्थं भवति। तात्पर्यम् अस्ति यत् वाच्यवाचकसम्बन्धार्थज्ञानं विना सर्वत्र श्रवणक्रियाया वैचर्थ्यापतिर्भवति। यथा कष्चिद् प्रोच्यमानाम् आघ्गलभाषायां श्रृणोति, किन्तु तदर्थं न जानाति, तेन तत्र तद्भाषणस्य किंचित् फलं न भवति। अतोऽस्य वक्तव्यस्य तात्पर्यम् आयाति यत् श्रवणेन्द्रियक्रियायाः साफल्यं तदैव भवति, यदा श्रवणकर्ता शब्दानां तदर्थानांच सम्यग् ज्ञानं रक्षति। फलतः यावन्ति श्रव्यकाव्यानि सन्ति, तेभ्य आनन्दस्योपलब्धयो भाषाज्ञानं नितराम् अपेक्षितं भवति। यदि कष्चन पार्ष्वस्थितो रघुवंषस्य पाठं करोति तत्समीपे तिष्ठन् अन्यः कष्चिद् असंस्कृतज्ञः तं श्रृणोति, तदा तज्जन्यं फलम् आनन्दं वा न ज्ञास्यति। इयमेव स्थितिः श्रव्यकाव्यानां विषये भवति।

अपरम् दृष्यकाव्याना सम्बन्धे स्थितिः भिन्न भवति। दृष्ये काव्ये अभिनयो भवति। अभिनयस्तावत् चतुर्धा प्रोक्तो विद्यते। यथा प्रोक्तं साहित्यदर्पणे– ''आघ्गिको वाचिकष्चैवमाहार्यः सात्विकस्तथा'' इति। एतदनुसारं दृष्यकाव्ये नटः स्वकीयभावस्य प्रकाषनं चतुःप्रकारेण करोति। यथोक्तम् उपरि– आघ्गिके अभिनये केवलमघ्गविन्यासेनेव मनोभावः प्रकाष्यते। एवमेव आहार्याभिनये सात्विकाभिनये चापि भाषाप्रयोगः नापेक्ष्यते। केवलं वाचिकाभिनये एव शब्दानां प्रयोगो विधीयते। एवम्प्रकारेण वयं पष्यामो यत् दृष्यकाव्ये नाटकादिषु भाषणातिरिक्तेनापि उपायेन नटः स्वमनोभावस्य प्रकाषनं करोति। तत्र भाषाज्ञानस्य आवष्यकता न भवति। तेन भाषाज्ञानं विनापि श्रोता सामाजिको वा आघ्गिक सात्विकाहार्याभिनयमाध्यमेन अभिनयकर्तुरभिप्रायं ज्ञात्वा तद् गतभावम् अनुगत्य सुखी भवति। अनया रीत्या सिद्धयति यत् दृष्यकाव्यस्य आनन्दानुभूतौ चक्षुरिन्द्रियस्य अधिकं, श्रवणेन्द्रियस्य च प्रयोगोऽल्पतया प्रयोगो भवति।

एतेन अनधीताः, भाषानभिज्ञा अपि जनाः दृष्यकाव्यस्याभिनयम् अवलोक्य सानन्दं समययापने प्रभवो भवन्ति। अतएव निर्विवादतया विभिन्नेषु काव्यप्रभेदेषु नाटकमात्रमेव विषेषप्रयोजनकं सिद्धयति, अतएव काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तलेत्यादिना। प्राचीनकालादेव सर्वसमत्या अघ्गीकृतं वर्तते, यत् निःषेषकाव्यांगेषु नाटकं सर्वथा रम्यतागुणसम्पन्नं भवति। किंच रम्यत्वं सदा सर्वेभ्यः प्राणिभ्यो रोचतेतराम्। यदि किंचिद वस्तु कस्मैचिदपि इन्द्रियाय रोचते, तद्वस्तु मनसे हृदयायापि प्रियं संजायते। तदर्थंच प्राणी प्रयासरतो भवति। यतो हि शास्त्राणि आचक्षते यत् आत्मप्रियं वस्तु प्रति सर्वेषाम् अभिरुचिः प्रजायते क्वचिदपि आत्मनः प्रियाय एव जनाः प्रवर्तिताः भवन्ति।अतो हि नाटकं अभिनयमात्रेण प्राणिसामान्यस्य मनोरंजनं प्रकुर्वत् सर्वातिषायि रमणीयत्वम् उपगतम् अस्ति। अतः नाटकं नाम वस्तु, यहि दृष्यकाव्य मात्रस्य कृते रुद्धिं गतमस्ति, नितरां जीवने उपादेयं विद्यते। एतस्य पुष्टिः शास्त्रेषु यथास्थानं कृतमेव विद्यते। यथापूर्वमपि सघ्केतितं यत् नाटकमाध्यमेन मनोरंजनं कर्तुं महतो ज्ञानस्य विषेषैक्षणिकयोग्यतायाष्च प्रभावी भवति। अत्र पंक्तौ इदमप्यवधेयमस्ति। नाटकस्य लोकसाहित्यस्य च परस्परं गाढः सम्बन्धः विद्यते। यतो हि सर्वत्र नाटकस्य प्रसंगे उद्धयते यत् नाटके लोकसाहित्यस्य प्रतिबिम्बम् एव तिष्ठति, अर्थात् समाजे यत्–यत् संघटते तत् तदेव नाटके अभिनय माध्यमेन उपस्थाप्यते। यदा कथंचित् समाजे असंघटित प्रतिबिम्बस्य अभिनयः नाटके समागच्छेत् तर्हि तन्नाटकं दोषपूर्णं कथयितुम् शक्यते। अतः समाजान्तरगत प्रतिबिम्बस्यैव नाटकान्तराले वर्णना समुचिता भवति। इयमेव विषयं आधारीकृत्य रसानुभूति प्रसंगे शास्त्रकारैः रसानुभव कारिणां वर्गत्रयं निर्धार्यते। प्रथमम् अनुकार्यवर्गः, द्वितीयः अनुकर्तृवर्गः तृतीयः सभ्याः सामाजिकाः वा कथ्यन्ते। अनेन वर्गीकरणेन स्पष्टं भवति यत् अनुकार्यवर्गः सामाजिकस्तरयाः एव भवति। उदाहरणस्वरूपं यदि दुष्यन्तः शकुन्तला च सामाजिकस्तरे लोके वा प्रेमानुबंधितौ न भवेताम् तदा तौ अनुसृत्य अभिज्ञानषाकुन्तलं नाटकस्य रचना कथं स्यात्। अतः यदि नाटके अनुकार्यवर्गः आवष्यको विद्यते तर्हि नाटकानां लौकिक धरातलस्य सम्बन्धः अवष्यमेव स्वीकरणीयः भविष्यति।

अपररीत्या कथयितुम् शक्यते यत् नाटकं एव पर्यायरूपेण लोकसाहित्यं भवितुमर्हति। यतो हि अन्य काव्यषास्त्रीय विधानां संज्ञा अस्ति श्रव्यकाव्यं इति। श्रव्यकाव्ये आनन्दानुभूतेः श्रवणेन्द्रियं चक्षुरिन्द्रियं च द्वयमपि साधनरूपेण अपेक्षितं भवति। अत्रापि चक्षुरिन्द्रियं तदैव सार्थकं भवति यदा काव्यस्य अधेता शब्दार्थानां सम्यग् अध्येता बोद्धा च भवति। अर्थात् यावत् शब्दार्थयोः सम्यक् अनुभावकः न भविष्यति पाठकः तावत् स शब्दार्थयोः बोद्धरा पाठकेन भाव्यं इति आवष्यकं न भवति। अर्थात् सामान्य जनोऽपि नाटकं दृष्ट्वा आधुनिक समये यथा चलचित्रं दृष्ट्वा जनाः प्रसन्नाः तुष्टाष्च भवन्ति तथैव प्रसन्नाः संजायन्ते। अतः लोकेऽपि दृष्यते यत् ग्रामे नगरे वा यत्र कुत्रापि नाटकस्य आयोजनं भवति तत्र सामान्य जनाः अपि ग्राम्याः अपि अवैयाकरणाः अपि अकाव्यपरिपक्वाः अपि तत्र सोत्साहं गच्छन्ति।

**निष्कर्षः**

षिवतत्वरत्नाकर ग्रन्थस्य तृतीये तरंगे लिखितमस्ति यद् देवराजइन्द्रेण अभ्यर्थितो ब्रह्मा महेन्द्रस्यानन्दाय भरताय नाट्यषास्त्रं समुपदिष्टवान्।

> **यथा– इन्द्राभ्यर्थनया पूर्वं भरताय चतुर्मुखः।**
> **प्रमोदाय महेन्द्रस्य नाट्यं समुपदिष्टवान्।।** [1]

तदा प्रभृति भरतमुनिप्रणीतं नाट्यषास्त्रमेव प्राचीनतमः प्रामाणिको ग्रन्थ इति विद्वत्समाजे धारणा। षूद्राणां स्त्रीणांच न वेदाध्ययनेऽधिकारः इति मनसि निधाय तेषां समुद्धारः कथं भवेदिति कृत्वा पंचमवेदरूपेण नाट्यषास्त्रस्य निर्माणं संजातमिति। यद्यपि साहित्यस्य शोधविषयोयं तथापि अत्र शूद्राणां स्त्रीणांच वेदाध्ययनेनधिकार विषये औचित्यानौचित्यमाधृत्य किंचिद् विचारयामि वेदान्तदर्षनस्यापषूद्राधिकरणे विषयोयं पूर्वपक्षोत्तर पक्षरूपेण उत्थाप्यादिषंकराचार्येण विष्लेषितः। अत्र प्रष्नोयं समुदेति यद् यस्य कृते अधिकरणमिदमारब्धम् तस्य शूद्रस्य स्वरूपं किमस्ति। केचन–ब्राह्मण–क्षत्रिय–वैष्या एव आर्याः एभिर्विजित अनार्या एव शूद्र नाम्ना परिगण्यन्ते। अपरे कथयन्ति– यत् षूद्रोपि आर्याजातिरेव किन्तु सृष्टिकर्त्तुं पादाभ्यां–तस्योत्पत्तिः अन्येच निगदन्ति ब्राह्मणादिजातिषु ये वेदाध्ययनं परित्यज्य परसेवया जीविकां निर्वहन्ति स्म ते एव शूद्राः। एषु प्रथमः पक्ष पाष्चात्यानां मतवादः। यस्य समर्थनं शास्त्रे कुत्रापि न दृष्यते। द्वितीय तृतीयपक्षयोः समर्थने शास्त्रप्रमाणं प्रचुरतया मिलति। ये खलु वदन्ति यत् सृष्टिकर्त्तुः पादाभ्यां शूद्रजातेरुत्पत्तिः तेषां मते तु जगन्माता जातिः सिध्यति। यतः नवकल्पारम्भे सृष्टियादौ एव सृष्टिकर्त्तुः तत्तत अवयवेभ्यः पृथक्–पृथक् ब्राह्मणादि शूद्रान्तम् यावत् जाति चतुष्टयाष्चोत्पत्तिजायते तान् उत्पत्तिं प्रति छान्दोग्योपनिषद् रमणीयचरणाः इति श्रुतिर्बलेन पूर्वजन्मनि कृतयोः पूर्णपादयोः हेतुत्वादपि तजन्मनि अनुष्ठितं किमपि कर्म गुणो वा तज्जातियप्राप्यते न भवति हेतुः अपरे कथयन्ति सर्वे वर्णाः आदौ ब्राह्मणाय एव आसन् किन्तु तजन्मनि अनुष्ठितानाम् कर्मणां गुणानांच वसात् ब्राह्मणाय एव तात्कालिक प्रचलित व्यवस्थानुसारेण कालक्रमे शूद्रान्त जातिचतुष्टयेषु विभक्ताः अभवन्।

अतः अयं पक्षः गुणकर्मजातिवादिनः तथा प्रथमः पक्षः जन्मगत जातिवादिनष्च। गुणकर्मगत जातिवादिनः जन्मगतजातिवादिनष्च मध्ये कः पक्षः श्रेयान् कष्च श्रुतिस्मृति सम्मतः। इदमेवात्र निरुपणीयम्। जन्मगत जातिभेद प्रतिपादकानि श्रुतिस्मृतिर्वाक्यानि निम्नांकितानि सन्ति।

**संदर्भाः**


1. शिवतत्वरत्नाकरे– षष्ठः कल्लोलः श्लोक 7 ऐतरेयारण्यके 2 2 10 साइक्लोपीडिया– भाग–3